संपातादारभ्य क्रान्तिः साध्या। उदयाश्च तत एव। स तु संपातो मेषादेः प्रागयनांशतुल्येऽन्तरे। अतः सायनांशात् खेटात् क्रान्तिर्भुक्तभोग्यकालौ चेत्युक्तम्। यदि त्रिज्यातुल्यया भुजज्यया जिनांशज्यातुल्या क्रान्तिज्या लभ्यते तदेष्टज्यया किमिति। फलं क्रान्तिज्या विषुवद्वृत्तात् तिर्य्यग्रूपा भवति। क्रान्तिज्या भुजत्रिज्या कर्णस्तद्वर्गान्तरपदमहोरात्रवृत्तव्यासार्धम्। सैव द्युज्या। अथ कुज्योच्यते। यदि द्वादशकोटेः पलभा भुजस्तदा क्रान्तिज्याकोटेः किमिति। फलं क्षितिजोन्मण्डलयोर्मध्येऽहोरात्रवृत्ते ज्यारूपं स्यात्। सैव कुज्या। सा धनुःकरणार्थं त्रिज्यावृत्ते परिणाम्यते। यदि द्युज्याव्यासार्धे एतावती तदा त्रिज्याव्यासार्धे किमिति। फलं चरज्या। तद्धनुश्चरमित्युपपन्नम्।" प्रमि० अत्रत्यो त्र शब्दे ४२९पृ० दर्शिते सि० शि० वाक्ये दृश्यम्

**कुज्झटि** स्त्री कु–क्विप् झट–इन् कर्म्म०। नीहारे(कोयासा) त्रिका० वा ङीप् कुज्झटीत्यप्यत्र। स्वार्थे क। कुज्झटिकापि तत्रार्थे शब्दरत्ना०। "ज्ञेया कुज्झटिका रूक्षा तमःप्राया च सा तथा। कफपित्तकरी लोके भिषग्भिः परिकीर्तिता" वैद्यके तद्गुणा उक्ताः।

**कुञ्चन** न०कुन्च–करणे ल्युट्। "वाताद्या वर्त्म सङ्कोच्य जनयन्ति यदा मलम्। तदा द्रष्टुं न शक्नोति कुञ्चनं नाम तद्विदुः" इति निदानोक्ते १नेत्ररोगभेदे। भावे ल्युट्। २सङ्कोचे। "कुर्य्यात् सिरागतं मूलसिराकुञ्चनपूरणम्" सुश्रुतः। [फलान्तत्वात् टाप्। कुष्माण्ड्याम् राजनि०।

**कुञ्चफला** स्त्री कुञ्चं सङ्कुचितं फलमस्याः जातित्वेऽपि

**कुञ्चि** पु० कुन्च–इन्। "अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम्" इत्युक्ते अष्टमुष्टिमाने स्मृतिः

**कुञ्चिका** स्त्री० कुन्च ण्वुल्–टाप्। १गुञ्जायाम्(कुँच)शब्दर० (कन्ची)२वंशशाखायाम् जटा० ३कूर्चिकायां(चाविकाटि) हेमच०। "उद्घाटिनी कुञ्चिका" प्रसन्नरा०४महीलतायाम् (केँचो) "कुञ्चिकयैनं भाययति विस्माययति वा" सुश्रु०

**कञ्चित** त्रि० कुन्च–क्त। १वक्रे२तगरपुष्पे न० राजनि०

**कुञ्ज** पु० न० अर्द्धर्चा० दि० कौ–जायते जन–ड पृषो० मुम्। पर्वतादौ लतादिभिराच्छादिते मध्यशून्ये १स्थाने निकुञ्जे अमरः। "लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन्" सा०द० "चल सखि! कुञ्जं सतिमिरपुञ्जम्" "कूजितकुञ्जकुटीरे" जयदे० "त्यक्त्वा गेहं झटिति यमुनामञ्जुकुञ्जं जगाम" पदा० २हस्तिदन्ते ३हस्तिहनौ ४मेदि० ऋषिभेदे ततः गोत्रापत्ये कुञ्जा० च्फञ्। कौञ्जायन तद्गोत्रापत्ये पुंस्त्री०

**कुञ्जर** पुंस्त्री०कुञ्जःदन्तो हनुर्वा प्राशस्त्येनास्त्यस्य। १हस्तिनि स्त्रियां जातित्वात् ङीष् "कुञ्जरस्येव संग्रामे परिगृह्याङ्कुशग्रहम्" भा०व०२६अ० "अद्रीन्द्रकुञ्जचरकुञ्जरगण्डकाष–संक्रान्तदानपयसोवनपादपस्य" माघः। अस्य समर्थेन व्याघ्रा० उपमितसमासः राजा कुञ्जर इव राजकुञ्जरः। "एवमुक्त्वा परिष्वज्य देवास्तं राजकुञ्जरम्" भा० व० २५१अ०। अत्र कुञ्जरसादृश्येन राज्ञः श्रेष्ठत्वम् गम्यते। तदभिप्रायेणैव "स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः" इत्यमरोक्तिः। ५देशभेदे च मेदि०। मात्राप्रस्तारे पञ्चमात्रस्य प्रथमे ६प्रस्तारे ऽऽ। छन्दोग्रन्थः। "क्षितेर्दक्षिणदिग्स्थिते गजाकृतौ ७पर्व्वतभेदे। "कृत्वा प्राचीविभागन्तु दक्षिणायामयोदिशि" इत्युपक्रमे "चकार कुञ्जरञ्चैव कुञ्जरप्रतिमाकृतिम्। पर्व्वतं काञ्चनगुहं बहुयोजनविस्तृतम्" हरिवं० २२५अ०। "ऋषभः पर्वतश्चैव श्रीमदृषभसंस्थितः। कुञ्जरः पर्वतश्चैव यत्रागस्त्यगृहं शुभम्" हरिवं० २२६ अ०। ८हस्तनक्षत्रे च तस्य हस्तिकराकारत्वात्तथात्वम्। कुञ्जरपिप्पली शब्दस्यान्त्यलोपे ९पिप्पल्याञ्च शब्दचि०। [मूलमस्य। मूलके राजनि०।

**कुञ्जरक्षारमूल** पु० कुञ्जरस्य गजपिप्पल्या इव क्षारस्तथं

**कुञ्जरच्छाय** न० कुञ्जरस्यच्छायायत्र। "योगोमघात्रयोदश्यां कुञ्जरच्छायसंज्ञितः। भवेन्मघायां संस्थे च शशिन्यर्के करस्थिते" इत्युक्ते योगभेदे। विवृतमेतत् ति०त० यथा "करे हस्तायां तत्स्थे सूर्य्ये। मघासंस्थे चन्द्रे चेति मघात्रयोदश्यां कुञ्जरच्छायसंज्ञितो योगो भवति। हस्तावस्थानञ्च सूर्य्यस्य कन्यादशमांशोत्तरकिञ्चिदधिकसप्तदशयोदशांशं १३,२० यावत्। नचानेन कुञ्जरच्छाययोगः सङ्केतितो नतु गजच्छायेति वाच्यं कुञ्जरच्छायस्य गजच्छायादिका संज्ञा जाता अस्येतीतचप्रत्ययेन गजच्छायायाअपि सङ्केतितत्वात् (धुस्तूरः कनकाह्वयः) इतिवत्। व्यक्तं कल्पचिन्तामणौ। "कृष्णपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः। यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते।" "एवञ्च श्राद्धे निमित्तान्तरत्वेनानङ्गीकाराद्गौड़ीयमैथिलाभ्यां कुञ्जरच्छाययोगः फलातिशयार्थ इत्युक्तम्। ततश्च मघात्रयोदशीश्राद्धं कृत्वा परदिने कुञ्जरच्छाययोगे श्राद्धं कर्त्तव्यमिति वाचस्पतिमिश्रोक्तं हेयम्।" मनुव्या० कुल्लूकभट्टेन एतस्य तिथ्यन्तरेऽपि सम्भव उक्तः